पात्रं तदुपरि न्यस्येत्ताम्रं वैणवमेव वा ॥
तत्रोपवेश्य च स्नाप्य देवं विशदचन्दनैः ।
आलिप्य शुभ्रं वसनं दद्याच्छत्रञ्च पादुके ॥
वासुदेवायेति शिरः श्रीधरायेति वै मुखम् ।
कृष्णायेति च कण्ठं वै वक्षः श्रीपतये इति ॥
शङ्खास्त्रधारिणे बाहू कक्षे च व्यापकाय वै ।
कवीशायोदरं मेढ्रं त्रैलोक्यजननाय च ॥
जघनं चार्च्चयेद्विद्वान् सर्व्वाधिपतये इति ।
सर्व्वात्मने इति पदावेवमङ्गानि पूजयेत् ॥
शङ्खचक्रगदापद्मशार्ङ्गशरविभूषितम् ।
गृहाणार्घ्यं मया दत्तं शार्ङ्गपाणे ! नमोऽस्तु ते ॥
इत्यर्घ्यं पूर्व्ववत् कृत्वा धूपदीपौ समर्प्य च ।
घृतपक्वप्रधानानि नैवेद्यानि निवेदयेत् ॥
ताम्बूलादीनि दत्त्वाथ कृत्वा जागरणं निशि ।
प्रातःस्नात्वार्च्चयित्वेशं पुष्पाञ्जलिमथार्च्चयेत् ॥
नमस्ते अस्तु गोविन्द बुध श्रवणसंज्ञक ।
अघौघं चाक्षयं कृत्वा सर्व्वसौख्यप्रदो भव ॥
इति प्रार्थ्य ततः सर्व्वं दत्त्वा चार्घ्यं प्रतोष्य
हि ।
शक्त्या विप्रान् भोजयित्वा सुखं पारणमाचरेत् ॥
भाद्रे मासि बुधस्याह्नि यदि स्याद्विजयाव्रतम् ।
तदा सर्व्वव्रतेभ्योऽस्य माहात्म्यमतिरिच्यते ॥"
इति श्रीहरिभक्तिविलासे १३ विलासः ॥
(सहदेवपत्नी । यथा, महाभारते ।१।६५।८०।
"सहदेवोऽपि माद्रीमेव स्वयंवरे विजयां नामोपयेमे मद्रराजस्य द्युतिमतो दुहितरं तस्यां पुत्त्रमजनयत् सुहोत्रं नाम ॥"॥
पुरुवंशीयभूमन्योः पत्नी । यथा, तत्रैव । १ । ६५ । ३३ ।
"भूमन्युः खलु दाशार्हीमुपयेमे विजयां नाम तस्यामस्य जज्ञे सुहोत्रः ॥")
विजयासप्तमी, (विजयाख्या सप्तमी ।) रविवारे शुक्लपक्षीया सप्तमी । यथा,—
"शुक्लपक्षस्य सप्तम्यां सूर्य्यवारो यदा भवेत् ।
सप्तमी विजया नाम तत्र दत्तं महाफलम् ॥"
इति तिथ्यादितत्त्वम् ॥ ॥
अथ विजयोत्सवविधिः ।
"रथमारोप्य देवेशं सर्व्वालङ्कारशोभितम् ।
सासितूणधनुर्व्वाणपाणिं नक्तञ्चरान्तकम् ॥
स्वलीलया जगत्त्रातुमाविर्भूतं रघूद्वहम् ।
राजोपचारैः श्रीरामं शमीवृक्षतलं नयेत् ॥
सीताकान्तं शमीयुक्तं भक्तानामभयङ्करम् ।
अर्च्चयित्वा शमीवृक्षमर्च्चयेद्विजयाप्तये ॥"
तत्र मन्त्रः ।
"शमी शमयते पापं शमी लोहितकण्टका ।
धरित्र्यर्ज्जुनबाणानां रामस्य प्रियवादिनी ॥
करिष्यमाणा या यात्रा यथाकालं सुखं मया ।
तत्र निर्व्विघ्नकर्त्री त्वं भव श्रीरामपूजिता ॥
गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदम् ।
गीतवादित्रनिर्घोषैस्ततो देवं गृहं नयेत् ॥
केचिद्वदेत्तत्र भाव्यं केचिद्गायन्ति वानरैः ।
केचिन्नृत्तसुखैर्भाव्यं कोशलेन्द्रस्य तुष्टये ॥
निर्ज्जिता राक्षसा दैत्या वैरिणो जगतीतले ।
रामराज्यं रामराज्यं रामराज्यमिति ब्रुवन् ॥
आनीय स्थापयेद्देवं निजसिंहासने सुखम् ।
ततो नीराज्य देवेशं प्रणमेद्दण्डवद्भुवि ॥
महाप्रसादवस्त्रादि धारयेद्वैष्णवैः सह ।
इति श्रीविष्णुधर्म्मोक्तानुसारेण यथेच्छयम् ॥
विधिः श्रीरामविजयोत्सवस्योत्सवकृत् सताम् ।
सीता दृष्टेति हनुमद्वाक्यं श्रुत्वाकरोत्प्रभुः ॥
विजयं वानरैः सार्द्धं वासरेऽस्मिन् शमीतलात् ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥
विजयिनं, त्रि, विजितम् । इत्यमरटीकायां रायमुकुटः ॥
विजयी, [न्] त्रि, (विशेषेण जेतुं शीलमस्य । वि+जि+"जिदृक्षिविश्रीति ।" ३ । २ ।१५७। इति इनिः ।) जययुक्तः । यथा,—
"यज्ञपञ्जरनामेदं यो रामकवचं पठेत् ।
स चिरायुः सुखी पुत्त्री विनयी विजयी
भवेत् ॥"
इति तन्त्रसारः ॥
(पुं, अर्ज्जुनः । यथा,—
"अर्ज्जुनः फाल्गुनो जिष्णुः किरीटी श्वेतवाहनः ।
वीभत्सुर्व्विजयी कृष्णः सव्यसाची धनञ्जयः ॥
एतान्यर्ज्जुननामानि प्रातरुत्थाय यः पठेत् ।
उद्यतेष्वपि शस्त्रेषु हन्ता तस्य न विद्यते ॥"
इति सर्व्वजनप्रसिद्धम् ॥)
विजयोत्सवः, पुं, (विजयायामुत्सवः ।) आश्विनशुक्लदशमीविहितभगवदुत्सवविशेषः । यथा,
"आश्विनस्य सिते पक्षे दशम्यां विजयोत्सवः ।
कर्त्तव्यो वैष्णवैः सार्द्धं सर्व्वत्र विजयार्थिना ॥"
अथ विजयोत्सवविधिः ।
"रथमारोप्य देवेशं सर्व्वालङ्कारशोभितम् ।
सासितूणधनुर्व्वाणपाणिं नक्तञ्चरान्तकम् ॥
स्वलीलया जगत्त्रातुमाविर्भूतं रघूद्वहम् ।
राजोपचारैः श्रीरामं शमीवृक्षतलं नयेत् ॥
सीताकान्तं शमीयुक्तं भक्तानामभयङ्करम् ।
अर्च्चयित्वा शमीवृक्षमर्च्चयेद्विजयाप्तये ॥"
तत्र मन्त्रः ।
"शमी शमयते पापं शमी लोहितकण्टका ।
धरित्र्यर्ज्जुनबाणानां रामस्य प्रियवादिनी ॥
करिष्यमाणा या यात्रा यथाकालं सुखं मया ।
तत्र निर्व्विघ्नकर्त्री त्वं भव श्रीरामपूजिता ॥"
इति ॥
"गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदम् ।
गीतवादित्रनिर्घोषैस्ततो देवं गृहं नयेत् ॥
केचिद्वदेत्तत्र भाव्यं केचित् भाव्यञ्च वानरैः ।
केचिन्नृत्तसुखैर्भाव्यं कोशलेन्द्रस्य तुष्टये ॥
निर्ज्जिता राक्षसा दैत्या वैरिणो जगतीतले ।
रामराज्यं रामराज्यं रामराज्यमिति ब्रुवन् ॥
आनीय स्थापयेद्देवं निजसिंहासने सुखम् ।
ततो नीराज्य देवेशं प्रणमेद्दण्डवत् भुवि ।
महाप्रसादवस्त्रादि धारयेत् वैष्णवैः सह ॥॥
इति श्रीविष्णुधर्म्मोक्तानुसारेण यथेच्छयम् ॥
विधिः श्रीरामविजयोत्सवस्योत्सवकृत् सताम् ॥
सीता दृष्टेति हनुमद्वाक्यं श्रुत्वाकरोत् प्रभुः ।
विजयं वानरैः सार्द्धं वासरेऽस्मिन् शमीतलात् ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥
विजरः, त्रि, जरारहितः । विगता जरा यस्येति बहुव्रीहिसमासनिष्पन्नः ॥ (यथा, कथासरित्सागरे । ४१ । ११ ।
"यः सर्व्वौषधियुक्तिज्ञश्चक्रे सिद्धरसायनः ।
आत्मानं तञ्च राजानं विजरं चिरजीवितम् ॥")
विजलं, त्रि, विजितम् । इति हेमचन्द्रः ॥ (विगतं जलं यस्मात् ।) निर्जलञ्च ॥ (यथा, बृहत्संहितायाम् । १६ । २० ।
"नष्टार्कचन्द्रकिरणातिरजोऽवनद्धा
तोयाशयाश्च विजलाः सरितोऽपि तन्व्यः ॥")
विजल्पः, पुं, (विशेषेण जल्पनमिति । वि+जल्प+घञ् ।) वाक्यविशेषः । यथा,—
"व्यक्तयासूयया गूढमानमुद्रान्तरालया ।
अघद्विषि कटाक्षोक्तिर्व्विजल्पो विदुषां मतः ॥"
इत्युज्ज्वलनीलमणिः ॥
विजातः, त्रि, (विरुद्धं जातं जन्म यस्य ।) विजन्मा । इति लोकप्रसिद्धः ॥
विजाता, स्त्री, (विशेषेण जातः पुत्त्रो यस्याः ।) जातापत्या । यथा,—
"विजाता च प्रजाता च जातापत्या प्रसूतिका ॥"
इति हेमचन्द्रः ॥
विजातीयः, त्रि, (विभिन्नां जातिमर्हतीति । विजाति+छः ।) विभिन्नधर्म्माक्रान्तः । यथा,
"प्रायश्चित्ताद्विजातीयात् तादृक्पापविनाशनम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(यथा च साहित्यदर्पणे ७ परिच्छेदे ।
"एवं पददोषसजातीया वाक्ये दोषा उक्ताः सम्प्रति तद्विजातीया उच्यन्ते ॥") विशेषजातिविशिष्टः । यथा,—
"प्रवाहो नादिमानेव न विजात्येकशक्तिमान् ।
तत्त्वे यत्नवता भाव्यमन्वयव्यतिरेकयोः ॥"
एष कार्य्यकारणप्रवाहो नादिमान् अनादिः । विजातीयेषु तृणादिषु एकशक्तिमान् न प्रवाहः । अन्वयव्यतिरेकयोस्तत्त्वे नियतत्वे नियतात्वनिर्व्वाहे यत्नवता भाव्यं यत्नः करणीयः वैजात्यमिति भावः । वह्निसामान्यं प्रति विजातीयोष्णस्पर्शवत्तेज एव कारणम् । इति हरिदासीयकुसुमाञ्जलिटीका ॥
विजिगीषुः, त्रि, (विजिगीषा अस्त्यस्येति । अर्श-आदित्वादच् ।) जयेच्छुः । इति सिद्धान्तकौमुदी ॥
विजिगीषा, स्त्री, (विजेतुमिच्छा । वि+जि+सन्+अः । स्त्रियां टाप् ।) स्वोदरपूरणाप्रशक्तिनिमित्तकनिन्दात्यागेच्छा । इत्यमरटीकायां